**Time : 1½ Hours** **SANSKRIT**

**Subject Code** **COMPOSITE (S.L.)**

| S | 1 | 1 | 6 | 3 |
|---|---|---|---|---|

**Total No. of Questions : 29** **(Printed Pages : 8)** **Maximum Marks : 40**

**सूचना :** (*i*) **सर्वे** प्रश्नाः अनिवार्याः सन्ति।

(*ii*) प्रश्नानां क्रमाङ्काः स्पष्टतया लेखनीयाः।

(*iii*) दक्षिणभागे दर्शिताङ्काः गुणाङ्काः सन्ति।

(*iv*) सम्पूर्णे उत्तरपत्रे एकस्याः एव स्वभाषायाः उपयोगः करणीयः।

(स्वभाषा नाम—मराठी, कोङ्कणी, हिन्दी, आङ्ग्लभाषा वा)

## प्रथमखण्डः (पठितावबोधनम्)

* अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् एकवाक्येन संस्कृतभाषया उत्तरत।

पर्वतशिखरस्य अधः नातिदूरे 'थळ' इति स्थानमस्ति, यत्र पूर्वम् अनेके प्रसिद्धाः सङ्गीतोपासकाः अखण्डतया सङ्गीतसाधनया शिवाराधनां कुर्वन्ति स्म। शिखरप्रदेशे बृहत्कृष्णशिलामध्ये 'चन्द्रेश्वर' नाम्ना प्रसिद्धं शिवलिङ्गं विलसति। चन्द्रेश्वरस्य दक्षिणे कोणे भूतनाथशिला अस्ति। तस्याः अग्रभागे एकं लघुवातायनमस्ति। तस्मात् भूतनाथः चन्द्रेश्वरदर्शनं करोति इव दृश्यते।

**प्रश्नाः**—

(1) भूतनाथशिलायाः अग्रभागे किम् अस्ति ? 1

(2) शिखरप्रदेशे किं विलसति ? 1

*	अधस्तनं पद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् एकवाक्येन संस्कृतभाषया उत्तरत।

चिन्तनीया हि विपदामादावेव प्रतिक्रिया।

न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे।।

वाल्मीकिव्यासबाणाद्याः प्राचीनाः कविपण्डिताः।

तान् शिक्षयन्ति सततं ये सदा वाचने रताः।।

**प्रश्नाः—**

(3) अस्माकं प्राचीनाः कविपण्डिताः के ? 1

(4) कूपखननं कदा न युक्तं भवति ? 1

*	एकस्य गद्यखण्डस्य अनुवादं स्वभाषया लिखत। 2

(5) बान्दोडकरमहाभागस्य पूर्णनामधेयं श्रीमान् दयानन्द बालकृष्ण बान्दोडकरः विद्यते।

सः गोवाप्रान्तस्य जनैः सह वात्सल्येन सौहार्देन च व्यवहरति स्म। सः स्वभावेन अतीव सरलः दयालुः च अवर्तत। जनानां हितकार्यसम्पादनाय सः सततमग्रजवत् यतते स्म।

**अथवा**

(5) डेविडः—शुचे! जानासि त्वम् ? अस्माकं ध्वजस्य किं नाम ? 2

शुचिः—अरे! कः एतादृशः भारतीयः यः अस्य ध्वजस्य विषये न जानाति ? अस्माकं देशस्य ध्वजः त्रिवर्णः इति।

सलीमः—शुचे! अस्य नाम त्रिवर्णः कथम् ?

देवेशः—अस्मिन् ध्वजे त्रयः वर्णाः सन्ति, अतः त्रिवर्णः। किं त्वम् एतेषां वर्णानां नामानि जानासि ?

*	उचितं वाक्यांशं चित्वा वाक्यं पूर्णं कुरुत।

(6) प्रतिवेशी ...................... . 1

- जलाय आह्वयत्।
- दुग्धाय आह्वयत्।
- भोजनाय आह्वयत्।
- स्नानाय आह्वयत्।

(7) माण्डव्याः प्रियसखी ...................... . 1

- पारनदी अस्ति।
- रगाडानदी अस्ति।
- जुवारीनदी अस्ति।
- खाण्डेपारनदी अस्ति।

* एकस्य पद्यखण्डस्य अनुवादं स्वभाषया लिखत।

(8) व्यसने मित्रपरीक्षा शूरपरीक्षा रणाङ्गणे भवति। 2

विनये भृत्यपरीक्षा दानपरीक्षा च दुर्भिक्षे।।

**अथवा**

(8) न सदा गुरुसान्निध्यं पिता कार्यान्तराकुलः। 2

माता पाकादिषु व्यग्रा तस्मात् वाचनमाश्रयेत्।।

* एकस्य प्रश्नस्य उत्तरं स्वभाषया लिखत।

(9) मूर्च्छां दूरीकृत्य माधवः मालतीं किम् अकथयत् ? 2

**अथवा**

(9) माण्डवीनद्याः विविधाः उपयोगाः के भवन्ति ? 2

*　पूर्णवाक्येन संस्कृतभाषया उत्तरं लिखत।

(10) माधव: जीवनं कथं यापयति स्म ? 1

(11) त्रिवर्णध्वजस्य श्वेतवर्ण: कस्य सूचक: अस्ति ? 1

*　सुभाषितं शुद्धं पूर्णम् च लिखत। 2

(12) शीलं सद्गुण ......................।।

**द्वितीयखण्ड: (अपठितावबोधनम्)**

*　अध: दत्तं गद्यखण्डं पठित्वा प्रश्नानाम् उत्तराणि एकवाक्येन संस्कृतभाषया लिखत।

वेत्ति अनया इति 'विद्या'। 'विद्या' अस्य शब्दस्य अर्थ: अस्ति 'ज्ञानम्'। शिशु: जन्मना पशुतुल्य: भवति किन्तु विद्यया तस्य द्वितीयं जन्म भवति। विद्या एव मानवं पशुभ्य: भिन्नं करोति। विद्याया: अध्ययनं कृत्वा एव मानव: 'ज्ञानी' भवति।

**प्रश्ना: —**

(13) मानव: ज्ञानी कथं भवति ? 1

(14) शिशु: जन्मना कीदृश: भवति ? 1

(15) 'विद्या' शब्दस्य अर्थ: क: भवति ? 1

*　एकं परिच्छेदं संस्कृतभाषया अनुवदत। 3

(16) इयं गौ: मानवानां गृहे वर्तते। बहवा: जना: अस्या: पालनं कुर्वन्ति। भारतीया: गोपूजका: सन्ति। सा अतीव उपयुक्ता वर्तते। सा मानवेभ्य: दुग्धं ददाति। काश्चन धेनव: गौरा: सन्ति। काश्चन कृष्णवर्णीया: काश्चन गौरकृष्ण-मिश्रिता:। सा तृणं खादति।

**अथवा**

(16) एकस्मिन् वनप्रदेशे अस्ति एक: तडाग:। कदाचित् एका पिपीलिका तस्मिन् अपतत्। सा जीवनार्थं प्रयत्नं करोति। तदा एव एक: कपोत: तां पश्यति। स: वृक्षस्य पर्णं तस्या: समीपे क्षिपति।

## तृतीयखण्डः (व्याकरणम्)

* अधोलिखितवाक्ययोः रिक्तस्थानयोः उचितानि पदानि चित्वा लिखत।

(17) भाऊसाहेबः ........................ स्निह्यति स्म। 1

- छात्राणाम्
- छात्रेभ्यः
- छात्रेषु
- छात्रान्

(18) त्रिवर्णध्वजम् आश्रित्य एवं स्वतन्त्रतायाः आन्दोलनम् .....................। 1

- अभवताम्
- अभवः
- अभवम्
- अभवत्

* सूचनानुसारं **द्वयोः** वाक्ययोः परिवर्तनं कृत्वा लिखत।

(19) सः जलं पिबति। (बहुवचने परिवर्तयत) 1

**अथवा**

(19) भारतीयाः ऑगस्ट मासस्य (15) दिनाङ्के स्वतन्त्रतादिवसम् आचरन्ति। 1

(अङ्कस्थाने सङ्ख्यावाचिपदं लिखत)

(20) भाऊसाहेबः एकः निपुणः क्रीडापटुः अस्ति। (वाक्यं भूतकाले परिवर्तयत) 1

**अथवा**

(20) अहं जनानां जीवनदायिनी असि। (वाक्यं संशोध्य लिखत) 1

* रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत।

(21) स्वतन्त्रतायाः आन्दोलने त्रिवर्णध्वजस्य महती भूमिका आसीत्। 1

(22) नद्याः जलं मधुरम् अस्ति। 1

* रिक्तस्थाने योग्यं समासनाम चित्वा लिखत।

(23) पर्वतशिखरम्—षष्ठी तत्पुरुषः। अस्य समासस्य विग्रहः कः ? 1

- पर्वतेषु शिखरम्
- पर्वतस्य शिखरम्
- पर्वतेभ्यः शिखरम्
- पर्वते शिखरम्

(24) अदोहनम्—न दोहनम्—इत्यत्र योग्यः समासः कः ? 1

- षष्ठीतत्पुरुषः
- द्वन्द्वसमासः
- अव्ययीभावः
- नञ् तत्पुरुषः

* विलोमपदं चित्वा लिखत।

(25) खिन्ना— 1

- गौणः
- दुःखितः
- दक्षिणः
- तुष्टा

* पर्यायपदं चित्वा लिखत। 1

(26) मनः–

- अनिलः
- पयः
- चित्तम्
- जलम्

## चतुर्थखण्डः (रचना)

(27) कोष्ठकात् उचितपदानि चित्वा द्वे सार्थकवाक्ये लिखत : 2

| | | |
|---|---|---|
| वयम् | कथां | गायति। |
| गायकः | दूरदर्शनम् | कथयसि। |
| त्वम् | गीतम् | पश्यामः। |

(28) अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः लिखत : 4

(1) जले स्वप्रतिबिम्बं दृष्ट्वा "एषः एव अन्यः सिंहः" इति मत्वा भासुरकः तस्मिन् कूपे अकूर्दत्।

(2) यदा शशकस्य क्रमः आगतः, तदा तस्य विलम्बागमनेन सिंहः कुपितः जातः।

(3) तदनन्तरं सिंहः पृच्छति–"कुत्र अस्ति सः ?" तदा चतुरः शशकः सिंहं कूपस्य समीपम् आनयत्।

(4) सः प्रतिदिनं बहून पशून् मारयित्वा खादति स्म।

(5) अतः लोके प्रसिद्ध 'बुद्धिर्यस्य बलं तस्य' इति।

(6) कस्मिंश्चित् वने 'भासुरकः नाम एकः सिंहः' वसति स्म।

(7) शशक: विलम्बस्य कारणम् अवदत्—हे वनराज! वने एक: अन्य: सिंह: अस्ति तथा च स: कथयति—"अहं वनराज: न तु भासुरक:"।

(8) तदा सर्वे पशव: विचारं कृत्वा प्रतिदिनं सिंहस्य पार्श्वे भोजनार्थम् एकं पशुं प्रेषयितुं निश्चितवन्त:।

(29) चित्रम् आधृत्य कोष्ठकस्थपदानां साहाय्येन चत्वारि संस्कृतवाक्यानि लिखत : 2

(बाल:, कुरुत:, वृक्ष:, दोला, खगा:, पत्राणि, पश्यत:, विहरन्ति)

